This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

* अथ *

संतान गोपाल

* स्तोत्रम् *

* प्रारम्भः *

प्रकाशक—फर्म बाबू बैजनाथ प्रसाद बुकसेलर,
सन् १९४० राजादरवाजा बनारस सिटी।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीमते रामानुजाय नमः

अथ संतानगोपालस्तोत्र प्रारम्भः ।

श्रीशंकमलपत्राक्षंदेवकीनंदनंहरिम् ॥ सुतसंप्राप्तये
कृष्णंनमामि मधुसूदनम् ॥ १ ॥ नमाम्यहं वासुदेवंसुत
संप्राप्तयेहरिम् ॥ यशोदांकगतंबालंगोपालंनंदनंदनम् ॥
॥ २ ॥ अस्माकंपुत्रलाभाय गोविंदमुनि बंदितम् ॥
नमाम्यहं वासुदेवं देवकीनंदनं सदा ॥ ३ ॥ गोपालं
डिंभकं वंदे कमलापतिमच्युतम् ॥ पुत्रसंप्राप्तये कृष्णं
नमामि यदुपुंगवम् ॥ ४ ॥ पुत्रकामेष्टिफलदं कंजाक्षं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कमलापतिम् ॥ देवकीनंदनं वंदे सुतसंप्राप्तयेमम ॥५॥
पद्मापते पद्मनेत्र पद्मनाभजनार्दनं ॥ देहि मे तनयं श्रीश
वासुदेव जगत्पते ॥६॥ यशोदांकगतं बालं गोविंदं मुनि
वंदितम् ॥ अस्माकं पुत्रलाभाय नमामि श्रीशमच्युतम्
॥७॥ गोविंदं मे सुतं देहि नमामि त्वां जनार्दन ॥ ८ ॥
भक्तकामद गोबिंद भक्तंरक्ष शुभप्रद ॥ देहि मे तनयं कृष्ण
रुक्मिणी वल्लभ प्रभो ॥९॥ रुक्मिणीनाथ सर्वेश देहि मे
तनयं सदा ॥ भक्त मंदारपद्माक्ष त्वामहंशरणंगतः ॥१०॥
देवकीसुत गोविंद वासुदेव जगत्पते ॥ देहि मे तनयं
कृष्ण त्वामहं शरणं गतः ॥ ११ ॥ वासुदेव जगद्वन्द्य
श्रीपते पुरुषोत्तम ॥ देहि मे तनयं कृष्ण त्वामहं शरणं
गतः ॥१२॥ कंजाक्ष कमलानाथ परकारुणिकोत्तम ॥ देहि
मे तन०॥१३॥ लक्ष्मीपते पद्मनाभ मुकुंद मुनिवंदित ॥
देहि मे तन० ॥१४॥ कार्य्यकारणरूपाय वासुदेवाय ते
सदा ॥ नमामि पुत्रलाभार्थं सुखदाय बुधाय ते ॥१५॥
राजीवनेत्र श्रीराम रावणारे हरे कवे ॥ तुभ्यं नमामि
देवेश तनयं देहि मे हरे ॥ १६ ॥ अस्माकं पुत्रला-
भाय भजामि त्वां जगत्पते ॥ देहि मे तनयं कृष्ण वासुदेव
रमापते ॥१७॥ श्रीमानी निमानचारे गोपीवस्त्रापहारक ॥
देहि मे तनयं कृष्ण वासुदेव जगत्पते ॥१८॥ अस्माकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०
२

गो

पुत्रसंप्राप्तिं कुरुष्व यदुनंदन ॥ रमापते वासुदेव मुकुंद
मुनिवन्दित ॥१९॥ वासुदेव सुतं देहि तनयं देहि माधव ॥
पुत्रं मे देहि श्रीकृष्णवत्सं देहि महाप्रभो ॥२०॥ डिंभकं
देहि श्रीकृष्ण आत्मजं देहि राघव ॥ भक्तमंदार मे देहि
तनयं नंदनंदन ॥२१॥ नंदनं देहि मे कृष्णवासुदेव जग-
त्पते ॥ कमलानाथ गोविंद मुकुन्द मुनिवंदित ॥२२॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ सुतं देहि
श्रियं देहि श्रियं पुत्रं प्रदेहि मे ॥ २३ ॥ यशोदा-
स्तन्यपानज्ञ पिबंतं यदुनंदनम् ॥ वंदेऽहं पुत्रलाभार्थं २
कपिलाक्षं हरिं सदा ॥२४॥ नंदनन्दन देवश नंदनं देहि

मे प्रभो ॥ रमापते वासुदेव श्रियं पुत्रं जगत्पते ॥२५॥
पुत्रं श्रियं श्रियं पुत्रं पुत्रं मे देहि माधव ॥ अस्माकं दी-
नवाक्यस्य अवधारय श्रीपते ॥२६॥ गोपालडिंभ गोविंद
वासुदेव रमापते ॥ अस्माकं डिंभकं देहि श्रियं देहि
जगत्पते ॥२७॥ मद्वांछितफलं देहि देवकीनंदनाच्युत ॥
मम पुत्रान्वितंधन्यंकुरुष्वयदुनंदन ॥ २८ ॥ याचेऽहंत्वां
श्रियंपुत्रं देहि मे पुत्रसंपदम् ॥ भक्तिचिंतामणे रामकल्प
वृक्ष महाप्रभो ॥२९॥ आत्मजं नंदनं पुत्रं कुमारं डिंभकं
सुतम् ॥ अर्भकं तनयं देहि सदा मे रघुनंदनं ॥ ३० ॥
वंदे संतानगोपालमाधवं भक्तकामदम् ॥ अस्माकं पुत्रसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राप्त्यै सदा गोविंदमच्युतम् ॥ ३१ ॥ ओँकारयुक्तं गोपाल
श्रीयुक्तं यदुनंदनम् ॥ क्लीयुक्तं देवकीपुत्रं नमामि यदुना-
यकम् ॥३२॥ वासुदेव मुकुंदेश गोविंद माधवाच्युत ॥
देहि मे तनयं कृष्ण रमानाथ महाप्रभो ॥३३॥ राजीव
नेत्र गोविंद कपिलाक्षहरे प्रभो ॥ समस्तकाम्यवरददेहि
मे तनयंसदा॥३४॥ पद्मनाभःअब्ज पद्मवृंद रूपंजगत्पते।
देहिमे वरसत्पुत्रंरमानायकमाधव॥३५॥नंदपाल धरापाल
गोबिंद यदुनंदन॥ देहि मे तनयंकृष्ण रुक्मिणीवल्लभ प्रभो
॥ ३६ ॥ दासमंदारगोविंद मुकुंदमाधवाच्युत ॥ गोपाल
पुंडरीकाक्षदेहि मे तनयं श्रियम् ॥३७॥ यदुनायक पद्मेश

नंदगोपवधूसुत ॥ देहि मे तनयं कृष्ण श्रीधरप्राणनायक
॥३८॥ अस्माकं वांछितं देहि देहि पुत्रं रमापते ॥ स्तुवंतं
कृष्ण सर्वेश वासुदेव जगत्पते ॥३९॥ रामहृदयसंभार
सत्यभामामनः प्रिय ॥ देहिमेतनयं कृष्ण रुक्मिणीवल्लभ
प्रभो ॥४०॥ चन्द्रसूर्यांक्ष गोविंद पुंडरीकाक्ष माधव ॥
अस्माकं भाग्यसत्पुत्रं देहिदेवजगत्पते॥४१॥कारुण्यरूप
पद्माक्षपद्मनाभसमर्चित ॥ देहिमेतनयंकृष्ण देवकीनन्द
नंदनं ॥ ४२ ॥ देवकीसुत श्रीनाथ वासुदेव जगत्पते ॥
समस्तकामफलद देहि मे तनयं सदा ॥ ४३ ॥ भक्तमंदार
गंभीर शंकराच्युतमाधव ॥ देहिमे तनयं गोप वालवत्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीपते ॥ ४४ ॥ श्रीपते वासुदेवेश देवकी प्रियनंदन ॥
भक्तमंदार मे देहि तनयं जगतां प्रभो ॥४५॥ जगन्नाथ
रमानाथ भूमिनाथ दयानिधे ॥ वासुदेवेशसर्वेशदेहिमे
तनयं प्रभो ॥४६॥ श्रीनाथ कमलपत्राक्ष वासुदेव जग-
त्पते ॥ देहिमे तनयं कृष्ण त्वामहं शरणं गतः ॥४७॥
दासमंदारगोविंद भक्तचिंतामणे प्रभो ॥ देहि मे तनयं
कृष्णत्वामहं शरणं गतः ॥४८॥ गोविंदपुंडरीकाक्ष रमा-
नाथ महाप्रभो ॥ देहि मे तनयं कृष्ण त्वामहं शरणंगतः
॥४९॥ श्रीनाथकमलपत्राक्ष गोविंद मधुसूदन ॥ मत्पुत्र
फलसिद्ध्यर्थं भजामि त्वां जनार्दन ॥५०॥ स्तन्यंपिबंतं

जननीमुखांबुजं विलोक्यमन्दस्मित मुज्ज्वलांगम् ॥
स्पृशंतमन्यस्तनमंगुलीभिर्वन्देयशोदांकगतं मुकुन्दम्
॥५१॥ याचेऽहं पुत्रसंतानं भवंतं पद्मलोचन॥ देहि मे तनयं
कृष्ण त्वामहं शरणं गतः ॥ ५२ ॥ अस्माकं पुत्रसंपत्ते
श्चिंतयामि जगत्पते ॥ शीघ्र मे देहि दातव्यं भवता
मुनिवंदित ॥५३॥ वासुदेवजगन्नाथ श्रीपते पुरुषोत्तम ॥
कुरुमां पुत्रदत्तं च कृष्णदेवेंद्रपूजित ॥५४॥ कुरुमां पुत्रदत्तं
च यशोदाप्रिय नंदन ॥ मह्यं वै पुत्रसंतानदातव्यं भवता
हरे ॥५५॥ वासुदेव जगन्नाथ गोविंद देवकीसुत ॥ देहि
मे तनयं राम कौशल्याप्रियनंदन ॥ ५६ ॥ पद्मपत्राक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोविंदविष्णो वामन माधव ॥ देहि मे तनयं सीताप्राण
नायक राघव ॥ ५७ ॥ कञ्जाक्ष कृष्णदेवेंद्रमंडितं मुनि
वंदितम् ॥ लक्ष्मणाग्रज श्रीराम देहि मे तनयं सदा ॥५८॥
देहि मे तनयं राम दशरथप्रियनंदन ॥ सीतानायक
कंजाक्ष मुचुकुंदवरप्रद ॥ ५९ ॥ विभीषणस्य या लंका
भवती दीयते पुरा ॥ अस्माकं तत्प्रकारेण तनयं देहि
माधव । ६०॥ भवदीयपदांभोजे चिंतयामि निरंतरम् ॥
देहि मे तनयं सीता प्राणवल्लभ राघव ॥ ६१ ॥ रामम-
त्काम्यवरद पुत्रोत्पत्तिफलप्रद । देहि मे तनयं श्रीश
कमलासनवंदित ॥६२॥ रामराघव सीतेश लक्ष्मणानुज

देहि मे ॥ भाग्यवत्पुत्रसंतान दशरथात्मज श्रीपते ॥६३॥
देवकींगर्भसंजात यशोदाप्रियनंदन ॥ देहि मे तनयं राम
कृष्ण गोपाल माधव ॥६४॥ कृष्णमाधव गोविंद वाम-
नाच्युतशंकर ॥ देहि मे तनयं श्रीश गोपबालकनायक
॥६५॥ गोपबाल महाधन्य गोविंदाच्युत माधव ॥ देहि
मे तनयं कृष्ण वासुदेव जगत्पते ॥६६॥ दिशतु दिशतु
पुत्रं देवकीनंदनोयं दिशतु दिशतु शीघ्रं भाग्यवत्पुत्र-
लाभम् ॥ दिशतु दिशतु श्रीशोराघवो रामभद्रो
दिशतु दिशतु पुत्रं वंशविस्तारहेतोः ॥ ६७ ॥ दीयतां
वासुदेवेन तनयं मत्प्रियं सुतम् ॥ कुमारं नंदनं सीताना-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संं० यकेन सदा मम ॥६८॥ राम राघव गोविंद देवकीसुत गो
६ माधव ॥ देहि मे तनयं श्रीश गोपबालकनायक॥६९॥
वंशविस्तारकं पुत्रं देहि मे मधुसूदन ॥ सुतंदेहि सुतंदेहि
त्वामहं शरणं गतः ॥ ७० ॥ ममाभीष्टसुतंदेहि कंसारे
माधवाच्युत ॥ सुतंदेहि सुतंदेहि त्वामहं शरणंगतः ॥७१॥
चंद्रार्ककल्पपर्यंतं तनयं देहि माधव ॥ सुतंदेहि सुतंदेहि
त्वामहं शरणं गतः ॥७२॥विद्यावंतं बुद्धिमंतं श्रीमंतं तनयं
सदा ॥ देहि मे तनयं कृष्ण देवकी नंदनं सदा ॥७३॥
नमामि त्वां पद्मनेत्र सुतलाभाय कामदम् ॥ मुकुंदं पुंड- ६
रीकाक्षं गोविंदं मधुसूदनम् ॥७४॥ भगवन्कृष्ण गोविंद

सर्वकामफलप्रद ॥ देहि मे तनयं स्वामिस्त्वामहं शरणं
गतः ॥७५॥ स्वामिस्त्वं भगवन् राम कृष्णमाधव कामद॥
देहि मे तनय नित्यं त्वामहं श० ॥७६॥ तनयं देहि गोविंद
कंजाक्ष कमलापते ॥ सुतंदेहि सुतंदेहि त्वामहं श०
॥७७॥ पद्मापते पद्मनेत्र पद्मजनक माधव ॥ सुतंदेहि
सुतंदेहि त्वामहं शरणं गतः ॥७८॥ शंखचक्रगदा खड्ग
शार्ङ्गपाणे रमापते ॥ देहि मे तनयं कृष्ण त्वामहं शरणं
गतः ॥७९॥ नारायण रमानाथ राजीवपत्रलोचन ॥ सुतं
मे देहि देवेश पद्मपद्मानुवंदित ॥८०॥ राम राघव गोविंद
देवकीवरनंदन ॥ रुक्मिणीनाथ सर्वेश नारदादिसुरार्चित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥८१॥देवकीसुत गोविंद वासुदेव जगत्पते॥देहि मे तनयं
७ श्रीश गोपबालकनायक ॥ ८२ ॥ मुनिवंदित गोविंद गो
रुक्मिणीवल्लभप्रभो ॥ देहि मे त० ॥ ८३ ॥ गोपिका-
र्जितपंकेजमकरंदासक्तमानस ॥ देहि मे त० ॥ ८४ ॥
रमाहृदयपंकेज लोलमाधवकामद॥ मामाभीष्टसुतं देहि
त्वामहं शरणं गतः ॥८५॥ वासुदेव रमानाथ दासानां
मंगलप्रद ॥ देहि मे तन० ॥८६॥ कल्याणप्रद गोविंद
मुरारे मुनिवंदित॥ देहि मे तन० ॥८७॥ पुत्रप्रद मुकुं-
देश रुक्मिणीवल्लभ प्रभो ॥ देहि मे त० ॥८८॥ पुंडरी-
काक्ष गोविंद वासुदेव जगत्पते ॥ देहि मे त० ॥८९॥ ७

दयानिधे वासुदेव मुकुंद मुनिवंदित ॥ देहि मे तन०
॥९०॥ पुत्रसंपत्प्रदातारं गोविंदं देवपूजितम् ॥ वंदामहे
सदा कृष्ण पुत्र लाभप्रदायिमे ॥९१॥ कारुण्यनिधये
गोपीवल्लभाय मुरारये॥ वंदामि पुत्रलाभार्थं देहिमे तनयं
विभो ॥९२॥ नमस्तस्मै रमेशाय रुक्मिणीवल्लभाय ते॥
देहि मे तनयं श्रीश गोपबालकनायक ॥९३॥ नमस्ते
वासुदेवाय नित्य श्रीकामुकाय च ॥ पुत्रदायक शेषेंद्र
शायिने रंगशायिने ॥९४॥ रंगशायि रमानाथ मंगलप्रद
माधव ॥ देहिमे तनयं श्रीश गोपबालकनायक ॥९५॥
दासस्य मे सुतं देहि दीनमंदार राघव ॥ सुतंदेहि सुतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहि पुत्रं देहि रमापते ॥९६॥ यशोदातनयाभीष्टपुत्रदा-
नरतः सदा देहि मे तनयं० ॥९७॥ मदिष्ठदेव गोविंद
वासुदेव जनार्दन ॥ देहि मे त० ॥९८॥ नीतिमान्धन-
वान्पुत्रो विद्यावांश्च प्रजायते ॥ भगवस्त्वत्कृपायाश्च वा-
सुदेवेंद्रपूजित ॥९९॥ यः पठेत्पुत्रशतकं सोपिसत्पुत्रवा-
न्भवेत् ॥ श्रीवासुदेवकथितं स्तोत्ररत्नं सुखाय च॥१००॥
जपकाले पठेन्नित्यं पुत्रलाभं धनं श्रियम् ॥ ऐश्वर्यं
राजसंमानं सद्यो याति न संशयः ॥ १०१ ॥

इति लक्ष्मी केशवसंवादे संतानगोपालस्तोत्रं संपूर्णम् ।

पं०श्रीलाल उपाध्याय द्वारा–श्रीविश्वेश्वर प्रेस, काशीमें मुद्रित ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.09.19 10:34
,TRANSFERRED=2019/09/16 at 10:39:57
,PAGES=11
,TYPE=STD
,NAME=S0001797
,Book Name=M-2230-SANTAN GOPAL STROT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection